# শ্রীবেঙ্কটেশাষ্টকম্

{॥ শ্রীবেঙ্কটেশাষ্টকম্ ॥}

শ্রীবেঙ্কটেশপদপঙ্কজ ধূলিপঙ্ক্তিঃ

সংসারসিন্ধুতরণে তরণির্নবীনা ।

সর্বাঘপুঞ্জহরণাযচ ধূমকেতুঃ

পাযাদনন্যশরণং স্বযমেব লোকম্ ॥ ১॥

শেষাদ্রিগেহতব কীর্তিতরঙ্গপুঞ্জ

আভূমিনাকমভিতঃসকলান্পুনানঃ ।

মৎকর্ণযুগ্মবিবরেপরিগম্য সম্যক্

কুর্যাদশেষমনিশঙ্খলু তাপভঙ্গম্ ॥ ২॥

বৈকুণ্ঠরাজসকলোঽপি ধনেশবর্গো

নীতোঽপমানসরণিংত্বযি বিশ্বসিত্রা ।

তস্মাদযংন সমযঃ পরিহাসবাচাম্

ইষ্টংপ্রপূর্য কুরু মাং কৃতকৃত্যসঙ্ঘম্ ॥ ৩॥

শ্রীমন্নারাস্তুকতিচিদ্ধনিকাংশ্চ কেচিত্

ক্ষোণীপতীন্কতিচিদত্রচ রাজলোকান্ ।

আরাধযন্তুমলশূন্যমহং ভবন্তং

কল্যাণলাভজননাযসমর্থমেকম্ ॥ ৪॥

লক্ষ্মীপতিত্বমখিলেশতব প্রসিদ্ধমত্র

প্রসিদ্ধমবনৌমদকিঞ্চনত্বম্ ।

তস্যোপযোগকরণাযমযা ত্বযা চ কার্যঃ

সমাগমৈদং মনসি স্থিতং মে ॥ ৫॥

শেষাদ্রিনাথভবতাঽযমহং সনাথঃ

সত্যংবদামি ভগবংস্ত্বমনাথ এব ।

তস্মাৎকুরুষ্বমদভীপ্সিত কৃত্যজালম্-

এবত্বদীপ্সিত কৃতৌ তু ভবান্সমর্থঃ ॥ ৬॥

ক্রুদ্ধোযদা ভবসি তৎক্ষণমেব ভূপো

রঙ্কাযতেত্বমসি চেৎখলু তোষযুক্তঃ ।

ভূপাযতেঽথনিখিলশ্রুতিবেদ্য রঙ্ক

ইচ্ছাম্যতস্তবদযাজলবৃষ্টিপাতম্ ॥ ৭॥

অঙ্গীকৃতংসুবিরুদং ভগবংস্ত্বযেতি

মদ্ভক্তপোষণমহংসততং করোমি ।

আবিষ্কুরুস্বমযি সৎসততং প্রদীনে

চিন্তাপ্রহারমযমেবহিযোগ্যকালঃ ॥ ৮॥

সর্বাসুজাতিষু মযাতু সমত্বমেব

নিশ্চীযতেতব বিভো করুণাপ্রবাহাত্ ।

প্রহ্লাদপাণ্ডুসুতবল্লব গৃঘ্রকাদৌ

নীচোন ভাতি মম কোঽপ্যত এব হেতোঃ ॥ ৯॥

সম্ভাবিতাস্তুপরিভূতিমথ প্রযান্তি

ধূর্তাজপং হি কপটৈকপরা জগত্যাম্ ।

প্রাপ্তেতু বেঙ্কটবিভো পরিণামকালে

স্যাদ্বৈপরীত্যমিবকৌরবপাণ্ডবানাম্ ॥ ১০॥

শ্রীবেঙ্কটেশতব পাদসরোজযুগ্মে

সংসারদুঃখশমনায সমর্প্যামি ।

ভাস্বৎসদষ্টকমিদং রচিতং

প্রভাকরোঽহমনিশংবিনযেন যুক্তঃ ॥ ১১॥

শ্রীশালিবাহনশকেশরকাষ্টভূমি (১৮১৫)

সঙ্খ্যামিতেঽথবিজযাভিধবৎসরেঽযম্ ।

শ্রীকেশবাত্মজৈদং ব্যতনোৎসমল্পং

স্তোত্রম্প্রভাকর ইতি প্রথিতাভিধানা ॥ ১২॥

ইতিগার্গ্যকুলোৎপন্ন যশোদাগর্ভজ-কেশবাত্মজ-প্রভাকর-কৃতিষু

শ্রীবেঙ্কটেশাষ্টকং স্তোত্রং সমাপ্তম্ ॥

শ্রীকৃষ্ণদাস তনুজস্য মযা তু

Stotram Digitalized By Sanskritdocuments.org

গঙ্গাবিষ্ণোরকারিকিল সূচনযাষ্টকং যত্ ।

তদ্বেঙ্কটেশমনসো মুদমাতনোতু

তদ্ভক্তলোকনিবহাননপঙ্ক্তিগং সত্ ॥

পিত্রোর্গুরোশ্চাপ্যপরাধকারিণো

ভ্রাতুস্তথাঽন্যাযকৃতশ্চদুর্গতিঃ ।

তেষুত্বযাঽথাপি কৃপা বিধীযতাং

সৌহার্দবশ্যেনমযা তু যাচ্যতে ॥

Encoded and proofread by YV Malleswara Rao malleswararaoy@yahoo.com

Brihatstotraratnavali

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Venkateshwara Ashtakam 1 Lyrics in Bengali PDF
% File name : venkateshAShTaka.itx
% Category : aShTaka
% Location : doc_vishhnu
% Author : prabhAkara See the last two verses
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

% Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
% Description-comments : Brihatstotraratnavali
% Latest update : July 21, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website